२. कृस्तावद् हेत्वाभासः? हेत्वाभासस्य कति भेदाः ? सलक्षणं सोदाहरणं च सर्वम् आलोचयत।

**उत्तरम्**-- 'हेत्वाभासः' इति शब्दस्य द्वौ अर्थौ— हेतोः दोषः, दोषयुक्तः हेतुः चेति। प्रथमार्थे व्युत्पत्तिः - आभासन्ते इति आभासाः, हेतोः आभासाः इति हेत्वाभासाः । द्वितीयार्थे व्युत्पत्तिः - हेतुवद् आभासन्ते ये ते हेत्वाभासाः। नव्य नैयायिकैः द्वयोरेव अर्थे हेत्वाभासः स्वीकृतः। दीपिकायां हेत्वाभासस्य लक्षणं कृतम्-- **'अनुमिति प्रतिबन्धक-यथार्थज्ञान-विषयत्वं हेत्वाभासत्वम्'** इति। मुक्तावल्यां हेत्वाभासस्य लक्षणं कृतम्- **'यद्विषयकत्वेन ज्ञानस्यानुमिति विरोधित्त्वं तत्त्वम्'** इति।

**<u>हेत्वाभासस्य भेदाः</u> –**

अन्नंभट्टेन उक्तम्- **'सव्यभिचार-विरुद्ध-सत्प्रतिपक्षासिद्ध-बाधिताः पञ्च हेत्वाभासाः'** इति। अर्थात् सव्यभिचारः, विरुद्धः, सत्प्रतिपक्षः, असिद्धः, बाधितश्चेति पञ्च हेत्वाभासाः।

**<u>सव्यभिचारः</u>** —— अन्नंभट्टेन अस्य लक्षणं कृतम्- **'सव्यभिचारः अनैकान्तिकः'** इति। यः हेतुः न ऐकान्तिकः, अर्थात् एकस्मिन् पक्षे न निश्चितः, क्वचित् साध्याधिकरणे, क्वचित् पुनः साध्याभावाधिकरणे विद्यते, स एव सव्यभिचारः हेत्वाभासः । यः हेतुः सपक्षे विपक्षे च उभयत्र विद्यते स एव अनैकान्तिकः हेतुः।

सव्यभिचारः त्रिविधः - साधारणः, असाधारणः, अनुपसंहारी चेति ।

**साधारणः अनैकान्तिकः** - अस्य लक्षणम्-- **'साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः ।"** साध्याभावाधिकरणे यः हेतुः न विद्यते स साधारणः अनैकान्तिकः हेत्वाभासः । यः हेतुः नियमितभावेन साध्यसहचरः साध्याभाव-सहचरश्च स साधारणः इति।

यथा- **पर्वतः अग्निमान् प्रमेयत्वात्।** अत्र पर्वतः पक्षः, अग्निमत्त्वं साध्यम्, प्रमेयत्वं च हेतुः । महानसादिः सपक्षः, जलह्रदादिः विपक्षः। प्रमेय शब्दस्य अर्थः-यथार्थज्ञानस्य विषयः । अत्र प्रमेयत्वस्य पक्षे पर्वते, सपक्षे महानसादौ, तथा विपक्षे वह्न्यभाववति जलह्रदादौ विद्यमानत्वात् साधारणः अनैकान्तिकः हेत्वाभासः।

**<u>असाधारणः अनैकान्तिकः</u>** — अस्य लक्षणम् -- **'सर्वसपक्ष-विपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः।'** सर्वसपक्षे विपक्षे च अवर्तमानः सन् यः केवलं पक्षे एव विद्यते सः असाधारणः अनैकान्तिकः हेत्वाभासः ।

यथा-शब्दः अनित्यः शब्दत्वात्। अत्र शब्दातिरिक्ते सर्वस्मिन् नित्ये अनित्ये च वस्तुनि शब्दत्वस्य अवर्तमानत्वात्, तथा केवलं शब्दे एव विद्यमानत्वात् असाधारणः अनैकान्तिकः हेत्वाभासः ।

**<u>अनुपसंहारी</u>** — अस्य लक्षणम्- **'अन्वयव्यतिरेक दृष्टान्तरहितोऽनुपसंहारी।"** यस्य हेतोः अन्वयी व्यतिरेकी च कोऽपि दृष्टान्तः नास्ति सः अनुपसंहारी अनैकान्तिकः हेत्वाभासः।

यथा- **सर्वम् अनित्यं प्रमेयत्वात्** । अत्र अनुमाने सर्वम् इति पक्षः, अनित्यत्वम् इति साध्यम्, प्रमेयत्वं च हेतुः इति। अत्र सर्वेषां वस्तूनां पक्षान्तर्भूतत्वात् सपक्षः विपक्षः वा दृष्टान्तः नास्ति ।

**<u>विरुद्धः</u>**—–अस्य लक्षणम्- **'साध्याभावव्याप्तो हेतुर्विरुद्धः।'** साध्याभावस्य व्याप्तिः यस्मिन् हेतौ विद्यते स विरुद्धः हेत्वाभासः ।

यथा-**शब्दः नित्यः कृतकत्वात्।** अत्र शब्दः पक्षः, नित्यत्वं साध्यम्, कृतकत्वं च हेतुः । कृतकत्वं कार्यत्वम् उत्पन्न-धर्मविशिष्टमित्यर्थः। अत्र शब्दे नित्यत्व-साधनार्थं कृतकत्व हेतोः प्रयोगात् विरुद्धः हेत्वाभासः । यतः कृतकत्वं नित्यत्वरूपस्य साध्यस्य न व्याप्यम्, परन्तु नित्यत्व-विरोधिनः अनित्यत्वस्यैव व्याप्यम्। कृतकत्वं नित्यत्व-विरोधि, तेन नित्यत्वं निरुध्यते। अतः अत्र विरुद्धः हेत्वाभासः।

**<u>सत्प्रतिपक्षः</u>**– अस्य लक्षणम्- **'यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। '** यस्मिन् अनुमाने साध्यसाधक हेतुवत् साध्याभाव-नाधकं हे न्तरं प्रयुज्यते तत्र सत्प्रतिपक्षः हेत्वाभासः भवति।

यथा- **'शब्दः नित्यः श्रावणत्वात् शब्दत्ववत्', 'शब्दः अनित्यः कार्यत्वात् घटवत्।** अत्र श्रावणत्व हेतुः सत्प्रतिपक्षदोषेण दुष्टः ।

**<u>असिद्धः</u>** - अन्नंभट्टेन अस्य लक्षणं न कृतम्। यः हेतुः साध्यवत् असिद्धः, तस्य हेतोः साध्य-साधनार्थं प्रयोगे कृते असिद्धः हेत्वाभासः भवति।

**असिद्धः हेत्वाभासः त्रिविधः** - आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।

**<u>आश्रयासिद्धः</u>**– यस्मिन् अनुमाने आश्रयः न सिद्धः निश्चितः वा, तत्र प्रयुक्तः हेतुः आश्रयासिद्धः । आश्रय-शब्देन पक्षः

बोध्यते, अतः अयं पक्षासिद्धः अपि उच्यते।

यथा— **गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्।** अत्र 'गगनारविन्दम्' आश्रयः पक्षः वा, परन्तु तस्य अस्तित्वं नास्ति, अतः तद् असिद्धम्। 'अरविन्दत्वात्' इत्यस्मिन् हेतौ पक्षधर्मतायाः अविद्यमानत्वात् आश्रयासिद्धः हेत्वाभासः।

**<u>स्वरूपासिद्धः</u>** - यः हेतुः पक्षे स्वरूपतः एव असिद्धः, अर्थात् पक्षे हेतुः न विद्यते, स स्वरूपासिद्धः।

यथा**— शब्दः अनित्यः चाक्षुषत्वात् रूपवत्।** अत्र 'चाक्षुषत्वात्' इति हेतुः शब्दरूपे पक्षे न विद्यते, यतः शब्दः श्रवणेन्द्रियग्राह्यः, न चक्षुरिन्द्रियग्राह्यः । अतः अत्र स्वरूपासिद्धः हेत्वाभासः ।

**<u>व्याप्यत्वासिद्धः</u>**– यस्मिन् हेतौ व्याप्तिः असिद्धा, स एव व्याप्यत्वासिद्धः । अयं सोपाधिकः हेतुरपि उच्यते। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधित्वम्। यः साध्यव्यापकोऽपि हेतोः अव्यापकः स उपाधिः इति। साध्य-समानाधिकरणः यः अत्यन्ताभावः तस्य अप्रतियोगि यत् तत् साध्यव्यापकम्। साधनाधिकरणे वर्तमानः यः अत्यन्ताभावः तस्य यत् प्रतियोगि तदेव साधनव्यापकम् ।

यथा----**पर्वतः धूमवान् वह्निमत्त्वात्।** अत्र पर्वतः इति पक्षः, धूमवत्त्वम् इति साध्यम्, वह्निमत्त्वं च हेतुः । अत्र आर्द्रेन्धनसंयोग उपाधिः। उपाधियुक्तत्वात् अत्र 'वह्निमत्त्वात्' इति हेतुः व्याप्यत्वासिद्धः ।

यत्र धूमः तत्र आर्द्रेन्धनसंयोगः इति साध्यव्यापकम् । परन्तु यत्र वह्निः तत्र आर्द्रेन्धनसंयोगः नास्ति अयोगोलके आर्द्रेन्धनाभावत् इति साधनाव्यापकम्। सोपाधिकत्वात् वह्निमत्त्वं व्याप्यत्वासिद्धम्।

**बाधितः** - अस्य लक्षणम्**- 'यस्य याध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः।'** यस्य हेतोः परामर्शकाले अनुमेयः साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः स बाधितः हेत्वाभासः ।

यथा-**वह्निः अनुष्णः द्रव्यत्वात्।**अत्र अनुष्णत्वं साध्यम्, तस्य अभावः उष्णत्वम्, परन्तु पक्षे वह्नौ अनुष्णत्वं न स्थातुमर्हति। यतः स्पार्शनप्रत्यक्षेण वह्नेः उष्णत्वमेव गृह्यते। अतः अत्र बाधितः हेत्वाभासः ।